# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – आचार्यः (SEM-2)** **प्रश्नपत्रम् – 5** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C.E.4.2.2** समयः - 3 तः 6 पर्यन्तम्

दिनाङ्कः –15/04/2019 सन्दर्भग्रन्थः – याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 एकस्य श्लोकस्य ससन्दर्भं व्याख्या कार्या।** **05**

(1) भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि।
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम् ॥

(2) प्रत्यर्थिनोऽग्रतो लेख्यं यथाऽऽवेदितमर्थिना।
समामासतदर्धाहर्नामजात्यादिचिह्नितम् ॥

**प्रश्नः-2 एकं सविस्तरं लिखत।** **10**

(1) स्मृतिग्रन्थेषु याज्ञवल्क्यस्मृतेः महत्त्वं प्रदर्शयत।

(2) व्यवहारस्य लक्षणं विलिख्य व्यवहारस्य जीवने कः प्रभावः?

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 द्वयोः कस्यचिदेकस्य ससन्दर्भपुरस्सरं व्याख्यां लिखत।** **05**

(1) यथाऽर्पितान् पशून् गोपः सायं प्रत्यर्पयेत् तथा।
प्रमादमृतनष्टांश्च प्रदाप्य कृतवेतनः ॥

(2) सामन्ता वा समग्रामाश्चत्वारोऽष्टो दशाऽपि वा ॥
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः ॥

**प्रश्नः-4 कस्याप्येकस्य सविस्तरमुत्तरं दीयताम्।** **10**

(1) याज्ञवल्क्यस्मृतिकर्तुः जीवननिदर्शनं कुरुत।

(2) सीम्नः विवादे कर्तव्याकर्तव्यविषये यथाग्रन्थं लिखत।

### तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः एकस्य ससन्दर्भं व्याख्या कार्या।** **05**

(1) बलाद् दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते।
स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि ॥

(2) सत्यासत्यान्यथास्तोत्रैर्न्यूनङ्गेन्द्रियरोगिणाम्।
क्षेपं करोति चेद् दण्ड्यः पणानर्धत्रयोदशान् ॥

**प्रश्नः-6 एकस्य सविस्तरमुत्तरं यच्छत।** **10**

(1) गृहीतवेतनकर्मणि स्मृतिविकारस्य विचारान् लिखत।

(2) वाक्पारुष्यविषये ग्रन्थानुरूपं लिखत।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 द्वयोः एकस्य ससन्दर्भं व्याख्या कार्या।** **05**

(1) गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति।
सोद्यं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते॥

(2) क्षुद्रमध्यमहाद्रव्यहरणे सारतो दमः।
देशकालवयः शक्तिः सञ्चिन्त्यं दण्डकर्मणि॥

**प्रश्नः-8 एकस्य सविस्तरमुत्तरं यच्छत।** **10**

(1) स्त्रीसंग्रहणे दण्डविधानं यथाग्रन्थं लिखत।

(2) सम्भूयसमुत्थानप्रकरणं ग्रन्थानुसारं लिखत।

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) याज्ञवल्क्यस्मृतेः कर्तुः नाम किम्?

(2) याज्ञवल्क्यस्मृतौ कति अध्यायाः सन्ति?

(3) स्मृत्योर्विरोधे कः बलवान्?

(4) अर्थशास्त्रापेक्षया किं शास्त्रं बलवत्?

(5) के साक्षिणः सन्ति?

(6) पशुस्त्रीणां सन्ततिः का?

(7) खरोष्ट्रं दण्डं कीदृशमस्ति?

(8) खर्वट – इत्यस्य कोऽर्थः?

(9) व्यवहाराध्याये कति प्रकरणानि सन्ति?

(10) आचारः कतमो धर्मः?

(11) प्रत्यर्थीति शब्दस्य कोऽर्थः?

(12) स्त्रीसंग्रहणं कतिविधम्?

(13) विक्रीयासंप्रदानस्वरूपं कतिविधम्?

(14) किं नाम साहसम्?

(15) साहसं कतिविधम्?